# nyAsa viMshatiH with commentary

# न्यास विंशतिः सव्याख्या

## Document Information

Text title : nyAsaviMshatiH

File name : nyAsaviMshatiH.itx

Category : major_works, vedAnta-deshika, viMshati, vedanta

Location : doc_z_misc_major_works

Author : vedAntadeshika

Transliterated by : Pallasena Narayanaswami ppnswami at gmail.com

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Commentary by the author himself

Source : Stotras of Vedanta Desika

Latest update : October 2, 2017, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# न्यास विंशतिः सव्याख्या

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥ १॥

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वात्
जन्मप्रध्वंसि जन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात् ।
निष्प्रत्यूहानृशंस्यान्नियतरसतया नित्यशेषित्वयोगात्
आचार्यः सद्भिरप्रत्युपकरणधिया देववत् स्यादुपास्यः ॥ २॥

सद्बुद्धिः साधु सेवी समुचितचरितस्तत्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीषः ।
शान्तो दान्तोऽनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
शिष्य प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः ॥ ३॥

स्वाधीनाशेषसत्ता स्थितियतनफलं विद्धि लक्ष्मीशमेकं
प्राप्यं नान्यं प्रतीया न च शरणतया कञ्चिदन्यं वृणीयाः ।
एतस्मादेव पुंसां भयमितरदपि प्रेक्ष्य मोज्झीस्तदऽज्ञां
इत्येकान्तोपदेशः प्रथममिह गुरोरेकचित्तेन धार्यः ॥ ४॥

मोक्षोपायार्हतैवं भवति भवभृतां कस्यचित् क्वाऽपि काले
तद्वद् भक्तिप्रपत्त्योरधिकृति नियमस्तादृशा स्यान्नियत्या ।
शक्ताशक्तादि तत्तत्पुरुषविषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित् तत् फलस्याविशेषात् ॥ ५॥

सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यतेऽभीष्टसिद्ध्यै

लोकेऽप्येतत् प्रसिद्धं न च विमतिरिह प्रेक्ष्यते क्काऽपि तन्त्रे ।
तस्मात् कैमुत्य सिद्धं भगवति तु भरन्यासविद्यानुभावम्
धर्मस्थेयाः च पूर्वे स्वकृतिषु बहुधा स्थापयांचक्रुरेवम् ॥ ६॥

शास्त्रप्रमाण्यवेदी ननु विधिविषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्वं प्रसाध्यम् ।
मैवं घोरापराधैः सपदि गुरुफले न्यासमात्रेण लभ्ये
शङ्का पार्ष्णि ग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः ॥ ७॥

नेहाभिक्रान्ति नाशो न च विमतिरिह प्रत्यवायो भवेदिति
उक्तं कैमुत्य नीत्या प्रपदनविषये योजितं शास्त्रविद्भिः ।
तस्मात् क्षेत्रे तदर्हे सुविदितसमयैर्देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्तिबीजं परिणति वशतः कल्पते सत्फलाय ॥ ८॥

न्यासः प्रोक्तोऽतिरिक्तं तप इति कथितः स्वध्वरश्चास्य कर्ता
अहिर्बुध्न्योप्यन्ववादीदगणि दिविषदामुत्तमं गुह्यमेतत् ।
साक्षान्मोक्षाय चासौ श्रुत इह तु मुधा बाध शङ्का गुणाढ्ये
तन्निष्टो ह्यन्यनिष्ठान् प्रभुरतिशयितुं कोटिकोट्यंशतोऽपि ॥ ९॥

नानाशब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यक्
न्यासोपासे विभक्ते यजनहवनवच्छब्दभेदादभाक्तात् ।
आख्या रूपादिभेदः श्रुत इतरसमः किञ्च भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिः स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम् ॥ १०॥

यत्किञ्चिद्रक्षणीयं तदवन निपुणे न्यस्यतोऽकिञ्चनस्य
प्रस्पष्टं लोकदृष्ट्याऽप्यवगमित इह प्रार्थनादङ्गयोगः ।
तस्मात् कर्माङ्गकत्वं व्यपनयति परापेक्षणाभाववादः
साङ्गे त्वष्टाङ्गयोगव्यवहृति नयतः षड्विधत्वोपचारः ॥ ११॥

पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभाव भाञ्जि प्रपत्तेः
कैश्चित् संभावितत्वं यदिह निगदितं तत् प्रपत्त्युत्तरं स्यात् ।
अङ्गेष्वङ्गित्ववादः फलकथनमिह द्वित्रिमात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम् ॥ १२॥

रक्षोपेक्षा स्वसाद्य प्रणयवति भरन्यास आज्ञादि दक्षे
दृष्टा नाऽत्र प्रपत्ति व्यवहृतिरिह तन्मेलने लक्षणं स्यात् । var तन्मेलनं
गेहागत्यादि मात्रे निपततु शरणागत्यभिख्योपचारात्

यद्वानेकार्थभावाद्भवति च विविधः पालनीयत्वहेतुः ॥ १३॥ var यद्वा नैकार्थं,  हि

आत्मात्मीयस्वरूपन्यसनमनुगतं यावदर्थं मुमुक्षोः
तत्त्वज्ञानात्मकं तत् प्रथममथ विधेः स्यादुपाये समेतम् ।
कैङ्कर्याख्ये पुमर्थेऽप्यनुषजति तदप्यर्थना हेतुभावात्
स्वाभीष्टानन्यसाध्यावधिरिह तु भरन्यासभागोऽङ्गिभूतः ॥ १४॥

न्यसादेशेषु धर्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ता
कार्पण्यम् वाऽङ्गमुक्तं भजनवदितरापेक्षणं वाऽप्यपोढम् ।
दुःसाधेच्छोद्यमौ वा क्वचिदुपशमितवन्यसंमेलने वा
ब्रह्मास्त्रन्याय उक्तस्तदिह न विहतो धर्म आज्ञादि सिद्धः ॥ १५॥

आदेष्टुं स्वप्रपत्तिं तदनुगुणगुणाद्यन्वितं स्वं मुकुन्दो
मामित्युक्त्वैकशब्दं वदति तदुचितं तत्र तात्पर्यमूह्यम् ।
तत्प्राप्य प्रापकैक्यं सकलफलदतां न्यासतोऽन्यानपेक्षाम्
प्राधान्याद्यं च किञ्चित् प्रथयति स परं श्रीसखे मुक्त्युपाये ॥ १६॥

स्वाभीष्टप्राप्तिहेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्धसाध्यप्रभेदात् ।
सिद्धोपायस्तु मुक्तौ निरवधिकदयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति पृथक् तद्वशीकारसिद्ध्यै ॥ १७॥

अत्यन्ताकिञ्चनोऽहं त्वदपचरणतः सन्निवृत्तोऽद्य नाथ
त्वत्सेवैकान्तधीः स्यां त्वमसि शरणमित्यध्यवस्यामि गाढम् ।
त्वम् मे गोपायिता स्यास्त्वयि निहितभरओऽस्म्येवमित्यर्पितात्मा
यस्मै स न्यस्तभारः सकृदथ तु सदा न प्रयस्येत् तदर्थम् ॥ १८॥ var सकृदिति तु

त्यक्त्वोपायानपायानपि परमजहन्मध्यमां स्वार्हवृत्तिम्
प्रायश्चित्तं च योग्यं विगतऋणततिर्द्वन्द्ववात्यां तितिक्षुः ।
भक्तिज्ञानादिवृद्धिं परिचरणगुणान् सत्समृद्धिं च युक्तां var युक्त्या
नित्यं याचेदनन्यस्तदपि भगवतस्तस्य यद्वाऽऽप्तवर्गात् ॥ १९॥

आज्ञा कैङ्कर्यवृत्तिष्वनघ गुरुजनप्रक्रिया नेमिवृत्तिः
स्वार्हानुज्ञातसेवा विधिषु च शकने यावदिष्टं प्रवृत्तः ।
कर्मप्रारब्धकार्यं प्रपदनमहिमध्वस्तशेषं द्विरूपं
भुक्त्वा स्वाभीष्टकाले विशति भगवतः पादमूलं प्रपन्नः ॥ २०॥

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः ॥ २१॥

संसारावर्तवेगप्रशमनशुभदृग्देशिक प्रेक्षितोऽहं
संत्यक्तोऽन्यैर् उपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निःशङ्कस्तत्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां var प्राप्य
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ॥ २२॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

न्यासविंशति व्याख्या

श्रीमन्निगमान्तमहादेशिकेः स्वयमनुगृहीता न्यासविंशति व्याख्या

श्रीः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रुतिस्मृत्यादितात्पर्यं निरूढा न्यासविंशतिः ।
स्वय व्याक्रियतेऽस्माभिः दिङ्मात्रेण सदिच्छया ॥

NOTE: In this commentary, there are many boldface entries (from the main
stotra) which are placed inside flower/curly brackets in the encoded text.
as text in bold font
- for easy identification. This is not visible in the processed
Devanagari file or in other scripts.

प्रपत्त्याद्यपरपर्यायां (var प्रपत्यपरपर्यायां ) न्यासविद्यां
सञ्जिघृक्षुः प्रथमं तत्त्वज्ञानादिमुखेन तदधिकार-
हेतुभूतमाचार्यसंग्रहणमाह (var सञ्जिवृक्षुः तत्त्वज्ञानादि
. . . संग्रहणमाह) – सिद्धम् इति ।

एतेषामाचायगुणानां प्रमाणानि "तद्विज्ञानार्थं स
गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं"

इत्यादीनि (var इत्यादीनि द्रष्टव्यानि ।) । श्रोत्रियं - श्रुतवेदान्तम् । समयानियतया - यथाकालं प्रवृत्तया; यद्वा धर्मज्ञसमयव्यवस्थितया । जितविषयगणं - स्ववशेन्द्रियवर्गम् । सम्यक् ज्ञानार्थतया गुर्वभिगमनेऽपि स्वेच्छया प्रवर्तमनस्य (var प्रवृत्तस्य) नियमांशमात्रे विधिरिति ज्ञापनार्थम् (var विधिज्ञापनार्थं) ईप्सेत् इति "सन् प्रयोग:" ॥ १॥

"आचार्यवान् पुरुषो वेद", " आचार्याद्धैव विदिता विद्या साधिष्ठं ६ रापत् ", "आचार्यवत्तया मुक्तौ" (var प्रापत् " आचार्यवत्तया मोक्षमामनन्ति ... मुक्तौ इत्याद्यनुसरतः आचार्यवरेण सिद्धे, 'देवमिव) इत्यादिप्रमाणानुसारतः आचार्यवरणे सिद्धे, "आचार्यदेवो भव", "देवमिवाचार्यमुपासीत" इत्यादिविहितं तत्सेवनमाह - अज्ञानध्वान्त इति ।

अत्र उक्ता हेतवः आचार्ये भगवति च अन्वीयन्ते ।जन्मप्रध्वंसिजन्म - विद्याजन्म । "ब्रह्मव्द्यािप्रदानस्य देवैरपि न शक्यते । प्रतिप्रदानमथवा दद्याच्छाक्तित आदरात् ॥ " इय्यभिप्रेय अप्रत्युपकरणधिया इत्युक्तम् ॥ २॥

सम्यगुपसन्नें सच्छिष्ये " तस्मै स विद्वान्" इत्यादिविहितमचार्यकृत्यमाह - सद्बुद्धिः इति ।

अभिमतं - मोक्षोपयुक्तमर्थजातम् (var इदं न दृश्यते) ॥ ३॥

मुक्तिकामस्य मूलमन्त्राद्यभिभिधेयतया शिक्षणीयेऽथ प्रधानांशं, तस्य च नित्यानु- सन्धेयत्वमाह (var मूलमन्त्राद्यभिप्रेततया शिक्षणीये प्रधानंशं तस्य नित्यत्वं चाह ) - स्वाधीन इति ॥ ४॥

ईदृशोपदेशलब्धसम्यग्ज्ञानस्य पुरुषस्य "अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्", " मामेकं शरणं व्रज" इत्यादिभिरपवर्गोपायतया विहितयोः भक्तिप्रपत्त्योः अधिकारिव्यवस्थामाह (var अधिकारव्यवस्था) - मोक्षोपय इति ॥ ५॥

इत्थमधिकारिभेदात् गुरुलघुविकल्पसंभवेऽपि

प्रपत्तिप्रभावे दुर्बुद्धीन् प्रयाययति – सानुक्रोश इति । वानरवायसराक्षसद्रौपदीगजेन्द्रसुमुखत्रिशङ्कुशुनश्शेफाद्युपख्यनैः इति शेषः । धर्मस्थेयाः - विबादगोचरधर्मनिर्णेतारः । पूर्वे - भगवद्यामुनादयः ॥ ६॥

सर्वशास्त्रसाधारणो विश्वासः, तस्य प्रपत्तिलक्षणवाक्ये महत्त्वेन विशेषणं किमर्थम् ? इत्यनुभाष्य परिहरति– शास्त्रप्रामाण्य इति ।
अत्र अर्थस्वभावेन शङ्काप्रकर्षसंभवात् तन्निवृत्यै " विदितः स हि धर्मज्ञः", " मित्रभावेन संप्राप्तम्", "सकृदेव प्रपन्नाय" इत्यादिप्रसिद्धशरण्यगुणविशेषादिपरामर्शभूम्ना (var इत्यदि्फ़शरण्यगुणविशेषदि विमर्शभूतमहविश्वासादिप्रकर्षः) विश्वासप्रकर्षः )संपाद्य इति भावः ॥ ७॥

किमीदृशविश्वाससापेक्षतया (var किमीदृशविश्वासापेक्षया) गुरुतरया प्रपत्त्या ? " सकृज्जप्तेन मन्त्रेण कृतकृत्यः सुखी भवेत्", " प्रपत्तिवाचैव निरीक्षितुं वृणे", इयादिप्रमाणसंप्रदायैः मुक्तिः सिध्येदित्यत्राह (var सिध्येदित्याह) - नेहाभिक्रान्तिनाश इति । उक्तम् - कर्मयोगप्रकरणे (var कर्मयोगाधिकारे) इति शेषः । "सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्" इत्यादि न्यायेन अत्र मन्त्रोच्चारणादिकं तन्मुखेनैव मुक्तिं साधयति । यथोक्तं सत्यकितन्त्रे (var सात्वततन्त्रे) "अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्याति" – इति ॥ ८॥

ननु एवं प्रपत्तिरपि भक्तियोगद्वारेणैव मुक्तिहेतुः स्यात् इत्याशङ्कायां, " मुमुकषुर्वै शरणमहं प्रपद्ये" इति श्रुतिस्वारस्यसिद्धमव्यवहितमोक्षसाधनत्वं व्यञ्जकान्त्रैरपि (var व्यञ्जकान्तरेणापि) द्रढयपि - प्रोक्तः। - "तस्मान्न्यासमेषां तपसामतिक्तमाहुः" इति वाक्येन । काथितः - "यः समिधा " इत्यारभ्य; "यो नमसा स स्वध्वरः" इत्यृगंशेन (var इतन्तेन ऋगंशेन, ... ईशानोऽन्वभाषत ।) । अन्ववादीत् - ऋगर्थमन्वभाषत । यथा

“समित्साधनकादीनां यज्ञानां न्यासमात्मनः । नमसा योऽकरोद् दैवे स स्वध्वर इतीरितः ।” इति । अगणि दिविषदामुत्तमं गुह्यमेतत् - “एतद्वै महोपनिषदं देवानां गुह्यम्” इत्यादिश्रुत्या । तन्निष्ठः इत्यादिना “सत्कर्मनिरताः शुद्धाः” इत्याद्युक्त प्रपन्न प्रभावो विवृतः । यद्यपि “ओमित्यात्मानं युञ्जीत” इति प्रणवकरणको न्यासः श्रुतः, तथाऽपि तदनर्हाणां तद्विरहेऽपि तन्त्रोक्तप्रकारेण (var तन्त्रोक्तप्रकरोऽत्र, तत्रोक्तप्रकारेण, तत्प्रयोगोत्र) तत्प्रयोगो युज्यते इत्यभिप्रायेण तन्निष्ठ इति सामान्योक्तिः । श्रुतिसिद्धेऽपि प्रपदने सामान्य धर्मभूत सत्यवचनादि नयात् सर्वाधिकारत्वं च न विरुद्धम् । “सर्वस्य शरणं सुहृत्” (var सुहृत्” इत्याद्यभिप्रेतं) । इत्यादिष्वेतदभिप्रेतम् ॥ ९॥

सन्तु भाष्योक्त प्रत्त भवत्यङ्गभूत प्रपत्ति प्रशंसापराणि एतानि वाक्यानि, गुणोपसंहारपादे प्रपत्तेः स्वतन्त्र विद्यात्व स्थापनाभावात्, अनन्यथासिद्ध समान न्यायाभावाच्च (var अनन्यथा सिद्धसामान्यन्यायभावाच्च) इति शङ्कायां, प्रपदनस्य मोक्षं प्रति पृथगुपायत्वोपपादनं तत्रैव सुस्पष्ठमियाह – अभाक्तात् - अनौपचारिकात् इत्यर्थः । सद्विद्या दहर विद्यादिषु शब्द भेदो हि तत्तद्गुणविशिष्ठ ब्रह्म विषय प्रत्ययावृत्त्यभिधायित्व (var ब्रह्मविषयप्रत्ययावृत्त्यभिधायि) रूपणोपपाद्यः; इह तु याग दान होमादिवत् अपर्यायतयैव व्युत्पत्तेः सिद्धः (var उत्पत्तेः सिद्धि) इति भावः । न्यासविद्या इतिआख्या । अर्थस्वभावादत्र अभिमत प्रदान सामर्थ्य विशिष्ठ पर निरपेक्ष रक्षकत्वं (var अभयप्रदानसामर्थ्यविशिष्टपरमकारुणिकतया) रूपम् । आदि शाब्देन परिकरप्रकरणयोः ग्रहणम् । इतरसमः - विद्यान्तरसमः । किं च इत्यादिना प्राग्दरिताधिकारि भेद स्मारणम् (var किं चेत्यादि प्राग्दर्शितधिकारिभेदस्मारणम् । भाष्ये तु प्रपत्तेः . . .) ) । स्वातन्त्र्येण मोक्षोपायत्वेन व्यावृत्त इहाधिकारो न स्यादिति शङ्कायां मधुविद्याद्य्दाहरणम् । भाष्ये तु प्रपत्तेः भक्त्यङ्गत्वोक्तिः न स्वातन्त्र्य बाधिका; विषय भेदादुभयाकारयोगिषु (var स्वातन्त्र्यविषयबाधिक,

. . . उभयाधिकारयोगिषु) क्वचिदन्यतरोक्तरविरोध्हात् ॥ १०॥

अङ्गत्वमेव प्रपत्तेः इति पक्षः परिहृतः । अथ स्वातन्त्र्येऽपि निरङ्गकत्वपक्षं परिहरति – अवगमितः - “तदेकोपायता याञ्चा प्रपत्तिः”, “अप्राधितो न गोपायेत्”, “शरणं च प्रपन्नानाम्” इत्यादिभिः इति शेषः । तस्मात् इत्यादिना “प्रपत्तेः कवचिद्प्येवं परापेक्षा न विद्यते” इत्यस्य निर्विषयत्व (var निरङ्गकत्व) शङ्काव्युदासः । तथा “षड्विधा शरणगतिः” इति वचनात् आग्नेयदि षड्कवत् आनुकूल्य  सङ्कल्पादि षड्कं संभूय एकं कारणं स्यादित्यत्रोत्तरम् – साङ्के तु  इत्यादि । “न्यासः पञ्चाङ्गसंयुतः” इति व्यवस्थापकवचनानुगुणमङ्गाङ्गिभाव समुच्चयेन षड्विधत्व वचनं नेयमिति भावः ॥ ११॥

एवमङ्गाङ्ऽगिभावः सिद्धः । तत्र अवान्तर्सर्वैयाकुलीं शमयति – प्रपत्तिदशायां प्रातिकूल्यवर्जनाद्यभावे साङ्गस्योपायस्य वैकल्यं स्यात् । पश्चात् तु प्रातिकूल्यस्य सम्भवेऽपि कृतस्योपायस्य न वैकल्यम्; कितु प्रत्यवाय परिहारार्थं यथार्ह प्रतिवरिधानमेव कार्यम् । “तथा पुंसामाविस्रम्भात् प्रपत्तिः प्रच्युता भवेत्” इत्येतदपि तात्कालिक विस्रम्भ वैकल्याभिप्रायम् । उत्तरकाले सतोऽपि विश्वासस्य पूर्वत प्रपत्यङ्गत्वाभावेन तद्विरहे । एवं च ब्रह्मास्त्र न्याय दृष्टान्तः अप्यत्र योग्यांशो स्थाप्यः, अन्यथा अतिप्रसङ्गात् । एतेन “उपायापायसंयोगे निष्ठया हीयतेऽनया” इत्येतदपि गतार्थम्, तत्कालिकोपायापाय संयोगस्य प्रपत्तिविरोधित्वे तात्पर्यात् । न च आनुकूल्यसङ्कह्पस्य अङ्गेन श्रवणात् सङ्कल्पितकरणमप्यङ्गं, तथा श्रुत्यभावात् यथाश्रुति सङ्कल्पिताचरनस्य अङ्गत्वकल्पनानुपपत्तेश्च । अकृत्यकरण स्वतन्त्रविधेरेव सिध्यति इति नोपप्लवावकाशः । । “ आनुकूल्ये (var सङ्कल्पितकरणस्य अङ्गत्वकल्पनानुपपत्तेश्च । आनुकूल्येतरा) तराभ्यां तु विनिवृत्तिरपयतः”  इत्यनेनापि अपायनिवृत्तौ सङ्कल्पादिविशेपस्य तात्कालिकोपयोगः प्रदर्श्यते (var प्रद्दश्यते) । अत्र आनुकूल्यशब्दो हि  तत्सङ्कल्पप्रतिपाद्गपरः, “आनुकूल्यस्य सङ्कल्पः” इत्यादि सिद्धानुवादात् (var

इत्यादि सिद्धानुवदत्वात्) । न च “उपायापाय” इत्यादौ प्रपत्तिनिष्ठाहानिर्विवक्षिता । किन्तु उपायापाय त्याग विशिष्ट मध्यम वृत्तिहानिः । विशेषणाभवेऽपि हि विशिष्टाभावः सिध्यति । अत एव हि तत्र “अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत्” इत्यादिना तावन्मात्रनिमित्तं प्रायश्चित्तमेव विधीयते । न तु पूर्वकृतां प्रपत्तिं प्रच्युतामभिप्रेय तत्फलार्थे पुनः प्रपत्तिः। १२॥

प्रस्तुत मुख्योपचर प्रयोग व्यवस्थपनाय प्रपत्तिलक्षणं शोधयति – प्रणयोऽत्र याञ्ञा । आज्ञा - आज्ञाकरणम् । आदिशब्देन भृतिदानादिसङ्ग्रहः । अनेकार्थभावात् - शरणशब्दस्य अनेकार्थरूढत्वादित्यर्थः । प्रपदनरूपत्वाभावेऽपि केषाञ्चित् गृहागमनादीनां रक्ष्यताहेतुत्वं प्रसिद्धमित्याभेप्रेत्य भवति च इत्यादिकमुक्तम् ॥ १३॥

एवं लौकिक वैदिक सर्वप्रपत्तीनां साधारणरूपमुक्तम् । (var साधारणरूपत्वमुक्तम्) । अथ मोक्षैकप्रयोजनायां प्रपत्तौ सर्वनिवृत्ति धर्मसाधारणं स्वाभाविक परशेषत्वानुसन्धानादिरूपं विशेषमाह – आत्मीयं उपायफलादि । आत्मा च आत्मीयाश्चेति यावन्तः अर्थाः सन्ति प्रमाणसिद्धाः तावतां सर्वेषां भगवच्छेषत्वानुसन्धानं कार्यम् । तच्चानुसन्ध्रानमुपायदशायामपि निवृत्तिधर्मविधिस्वाभाव्यादनुवर्तते । इह चामुत्र च स्वयम्प्रयोजने कैङ्ण्कर्ये स्वत एव भवति । अङ्गिभूतभरन्यासांशस्तु न यावदर्थे; किन्तु यथालोकं यावदनन्यसाध्यं स्वाभीष्टं तावत्येव भवतीत्यर्थः ॥ १४॥

सर्वशक्तौ भरं न्यस्यतः सर्वेधर्मत्यागवचनात् वर्णाश्रमादिधर्मरूपमाज्ञकैङ्कर्यं तदनुविद्गमनुज्ञाकैङ्कर्यं च न स्यातामित्यत्राह – क्वचित् – चापलात् अशक्यप्रवृत्ते कस्मिंश्चिदधिकारिणि । अन्यसम्मेलने - प्रपत्त्यङ्गच्युतिरिक्तानां तदर्थतया स्वीकृतौ । तत् - तस्मात् धर्माणां स्वरूपत्यागस्य प्रपत्यङ्गत्वभावात् तेषां प्रपत्यङ्गत्वेनानुपादानाच्च (var तस्मात् दत्तः सर्वधर्माणां . . . प्रपथ्यर्थत्वेनाप्रतिपादनाच्च) इत्यर्थः । सर्वधर्मत्यागवचनस्य अत्र सर्वाविरुद्धेषु

अर्थान्तरेषु सम्भवत्सु तद्विपरीतार्थकल्पनं न युक्तमिति भावः ।
एतेन अलेपकादिपक्षाश्च प्रतिक्षिप्ताः ॥ १५॥

ननु यदि प्रपत्तिरुपायः स्यात् तदा हि तस्या अङ्गत्वं, केचिदङ्गत्वं
च (var अङ्गित्वं तु) वक्तव्यम् । सा तु तत्तद्वाक्येषु
उपायतयोक्तस्य शरण्यस्य विशेषणतया प्रयुक्तैरेकादिशब्दैः
(var प्रयुक्तैरेकशब्दैः) उपायबुद्ध्यर्हत्वेन (var
एकोपायबुद्ध्यनर्हत्वेन) व्यवच्छिद्यते
(var व्यवह्रियते) । तस्मात् पूर्वोक्तं सर्वमयुक्तमित्यत्राह -
तत् - विध्यनुरोधेन नेतव्यत्वात् इति भावः । अन्यथाऽप्युपपन्नं
सिद्धोपायस्यैक्यं प्रपत्तेः तत्प्रसादोपायत्वं न विरुन्ध्यादिति भावः ।
एतेन निर्विशाद्वैतद्बुद्धि (var एवं निर्विशेशा ( text not
legible here in the original ) निरस्ताः (var एवं निर्विशेषा)
वेदितन्याः ॥ १६॥

उक्तार्थस्थिरीकरणाय सामान्यत उपायशब्दाथ (विद्वृण्वन्)
सिद्वसाध्योपायविशेषौ तत्प्रयोजनं च विभजते - समर्थितमेव
साङ्गभरन्यासं यथावदनुष्टनाय मुखभेदेन शिक्षयन्
तद्विषयकर्तव्यशेषं नास्तीत्याह- यस्मै प्रयोजनाय
इति शेषः । सकृत् इत्यनेन उपासनवद्वृत्तिसापेकषत्वं
(var उपासनवदस्यावृत्ति) नास्तीत्युच्यते । "सकृत् कृतः
शास्त्रार्थः" इत्यस्यात्रापवादो नास्ति । प्रत्युत "सकृदेव"
इत्यादिभिः अनुग्रह एव । सदा - यावत्फलप्राप्तीत्यर्थः ॥ १७॥

ननु न्यासनिष्ठमेव "तस्यैवं विदुषः" इति
परामृश्य, तत्कर्तव्यत्वेन पुरुषविद्याऽऽम्नाता । सा च
"यन्मरणं तदवभृथः" इत्यन्ता यज्ञदृष्टिरूपा
च । अतो यावज्जीवं तदर्थं कर्तव्यस्य विधीयमानत्वात्,
"न प्रयस्येत् तदर्थम्" इत्यनुपपन्नम् । मैवम् -
तत्रापि हि न्यस्तभरस्य कर्तव्यान्तरनैरपेक्ष्यमेव विवक्षितम् ।
यदि तु प्रस्तुतविद्याङ्गतयाऽत्र यज्ञक्लृप्तिर्विधीयते तर्हि
दर्शपूर्णमासादीनां क्लृप्तिर्न वाच्या । तेषां यज्ञोपयोगित्वाभावात्
अश्रुतापूर्वतदन्वितयज्ञान्तरकल्पनमनेकशास्त्रार्थदृष्टिविधिकल्पनं
(var अश्रुतपूर्वं) चात्यन्तगौरवोपहतम् । एकस्यावभृतात्

पूर्वमन्येषां क्लृप्तिश्चानुपपन्ना । तस्मात् “एवं शरणमभ्येत्य भगवन्तं सुदर्शनम् । अनुष्ठितक्रतुशतो भवत्येव न संशयः” इतिवत् यज्ञादिकं सर्वमस्य स्वतः सम्पन्नं भवतीति स्तुतिमात्रे तात्पर्यं ग्राह्यम् । शारीरकभाष्यमपि एतदविरोधेन भाव्यम् ॥ १८॥

कृतकृत्यस्योत्तरदशायां स्वाधिकारानुगुणं (var स्वाधेकाराद्यनुगुणं) त्याज्यं स्वतन्त्रविधिप्राप्तं कर्तव्यमनुसन्धेयं प्रार्थनीयं च सङ्गृह्णाति – उपायान् - काम्यधर्मान् । अपायान् - प्रत्यवायहेतून् । परं - केवलम्; प्रपत्युत्तरकालम् वा । मध्यमां - उपायापायवर्गानन्विताम् । स्वार्हवृत्तिं - - नित्यरूपां तत्समाननैमित्तिकरूपां च वृत्तिम् “अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् प्रायश्चित्तिरियं साऽत्र यत्पुनः शरणं व्रजेत् ॥” इत्युक्तमाह– प्रायश्चित्तं च योग्यम् इति । “अजहत्” इन्यनुषज्यते । “देवर्षिभूतात्मनृणां पितृणां न किङ्करो नायमृणी च राजन्” इत्याद्युक्तं सूचयति – विगतनृणताातिः इति । ब्रह्मचर्यादिभिरपाकर्तव्यं भगबत्प्रपन्नस्य प्रपत्यैव कृतम् (var प्रपत्यैवापाकृतं); देवयज्ञादिकं त्वस्य (var देवयज्ञादि कर्तव्यमस्य) मध्यमबृत्यनुप्रविष्टं कैङ्कर्यमिति भावः । द्वन्द्वातितिक्षावचनं पादानार्थं च । परिचरणगुणान् - कैङ्कर्योपकरणभूतान् गन्धपुष्पादीन् । यद्वा फलसङ्गत्यागादीन् । सत्समृद्धिरपि (var सत्समृद्धीरपि) कैङ्कर्यानुपयुक्ता नैव इत्युक्तम् । भगवतः इत्यादिना देवतान्तरेभ्यस्तदीयेभ्यश्च भक्त्यादिकमपि न याच्यमिति सूच्यते ॥ १९॥

उक्तप्रकारस्याधिकारिणः स्वाभिमतकाले परमफलप्राप्तमाह– प्रपत्यङ्गत्वान्देऽपि “विहितत्वाच्चाश्रमकर्माऽपि” इति न्यायेन स्वतन्त्राधिकारसिद्धे शक्तस्यास्य कर्तव्यम् आज्ञाकैङ्कर्यम् । अकरणे प्रत्यवायरहितम् अनुज्ञाकैङ्करयम् ।द्विरूपम् इति – पुण्यपापरूपमित्यर्थः ॥ २०॥

परमपुरुषार्थसाधिनीं भगवत्प्रपत्तिं प्रमाणतः प्रभावतः प्रवक्तृतश्च विशिंषन् तद्विपयग्रन्थनिर्माणप्रयोजनं च

प्रतिपादयति -

“यो ब्रह्माणं विदधाति पूर्वम्” इत्यादिकया श्रुत्या ;
“ देवानां दानवानां च,” “ शरण्यं शरणं च
(var देवानां च शरण्यं शरणं) त्वामाहुर्दिव्या महर्षयः
”, “ शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः”
इति स्मृत्यादिभिश्च; “स्थिते मनसि सुस्वस्थे”,
“सकृदेव प्रपन्नाय”, “ सर्वधर्मान् परित्यज्य”
इत्यादिभिः भगवद्वाक्यवर्गैश्च । सिद्धाम् - प्रमितामित्यर्थः ।
भगवच्छब्दः । स्वातन्त्रे पारतन्त्र्येपि - अव्यवधाबेन
व्यवधानेन वा मुक्तिसाधनत्वे ; यद्वा स्वतन्त्राङ्गत्वविवादेऽपि
इत्यर्थः गुजननग्रन्थाः स्तोत्रगद्यादयः ॥ २१॥

उक्तमुपायं सुखग्रहणाय स्वानुष्ठानमुखेन निगमयति – अत्र
सर्वशक्तौ परमकारुणिके सर्वाभिमतवरप्रदे न्यस्तभरत्वात्
निर्भरत्वनिर्भयत्वसीद्धिः
(var निर्भरत्व-निर्भयत्वादिसिद्धिः) ॥ २२॥

अयमत्र मुमुक्षोरनुशासनीयसंग्रहः–
सदाचार्योपसत्तिधूर्वकं सम्यक् ज्ञानं संपाद्य,
गुरुतरोपायान्तरनिष्पादनाद्यनुगुणज्ञानशाक्तिविरहान्निर्विण्णः,
स्वशक्यसङ्कत्कर्तव्यलधूपायपरामर्शेन प्रत्यवस्थापितः
फलसङ्गकर्तृत्वादित्यागयुक्तसाङ्गभरन्यासेन कृतकृत्यः
स्वीकृतभरं शरण्यं श्रियःपतिमवलोक्य निभरो निर्भयश्च
स्वयम्प्रयोजनकैङ्कर्येण सुखं वर्त इति ॥ २२॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*nyAsa viMshatiH with commentary*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*